श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीशङ्कराचार्य विरचितम्

# ॥ श्रीरामभुजङ्गप्रयातस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीरामभुजङ्गप्रयातस्तोत्रम् ॥

विशुद्धं परं सच्चिदानन्दरूपं
गुणाधारमाधारहीनं वरेण्यम्।
महान्तं विभान्तं गुहान्तं गुणान्तं
सुखान्तं स्वयं धाम रामं प्रपद्ये ॥ 1 ॥

शिवं नित्यमेकं विभुं तारकाख्यं
सुखाकारमाकारशून्यं सुमान्यम्।
महेशं कलेशं सुरेशं परेशं
नरेशं निरीशं महीशं प्रपद्ये ॥ 2 ॥

यदाऽवर्णयत्कर्णमूलेऽन्तकाले
शिवो राम रामेति रामेति काश्याम्।
तदेकं परं तारकब्रह्मरूपं
भजेऽहं भजेऽहं भजेऽहं भजेऽहम् ॥ 3 ॥

महारत्नपीठे शुभे कल्पमूले
सुखासीनमादित्यकोटिप्रकाशम्।
सदा जानकीलक्ष्मणोपेतमेकं
सदा रामचन्द्रं भजेऽहं भजेऽहम् ॥ 4 ॥

क्वणद्रत्नमञ्जीरपादारविन्दं
लसन्मेखलाचारुपीताम्बराढ्यम्।
महारत्नहारोल्लसत्कौस्तुभाङ्गं
नदच्चञ्चरीमञ्जरीलोलमालम् ॥ 5 ॥

लसच्चन्द्रिकास्मेरशोणाधराभं
समुद्यत्पतङ्गेन्दुकोटिप्रकाशम्।
नमद्ब्रह्मरुद्रादिकोटीररत्न
स्फुरत्कान्तिनीराजनाराधिताङ्घ्रिम्॥ 6॥

पुरः प्राञ्जलीनाञ्जनेयादिभक्तान्
स्वचिन्मुद्रया भद्रया बोधयन्तम्।
भजेऽहं भजेऽहं सदा रामचन्द्रं
त्वदन्यं न मन्ये न मन्ये न मन्ये॥ 7॥

यदा मत्समीपं कृतान्तः समेत्य
प्रचण्डप्रकोपैर्भटैर्भीषयेन्माम्।
तदाऽविष्करोषि त्वदीयं स्वरूपं
सदापत्प्रणाशं सकोदण्डबाणम्॥ 8॥

निजे मानसे मन्दिरे सन्निधेहि
प्रसीद प्रसीद प्रभो रामचन्द्र।
ससौमित्रिणा कैकयीनन्दनेन
स्वशक्त्यानुभक्त्या च संसेव्यमान॥ 9॥

स्वभक्ताग्रगण्यैः कपीशैर्महीशैः
अनीकैरनेकैश्च राम प्रसीद।
नमस्ते नमोऽस्त्वीश राम प्रसीद
प्रशाधि प्रशाधि प्रकाशं प्रभो माम्॥ 10॥

त्वमेवासि देवं परं मे यदेकं
सुचैतन्यमेतत्त्वदन्यं न मन्ये।
यतोऽभूदमेयं वियद्वायुतेजो
जलोर्व्यादिकार्यं चरं चाचरं च॥ 11॥

नमः सच्चिदानन्दरूपाय तस्मै
नमो देवदेवाय रामाय तुभ्यम्।
नमो जानकीजीवितेशाय तुभ्यं
नमः पुण्डरीकायताक्षाय तुभ्यम्॥ **12**॥

नमो भक्तियुक्तानुरक्ताय तुभ्यं
नमः पुण्यपुञ्जैकलभ्याय तुभ्यम्।
नमो वेदवेद्याय चाद्याय पुंसे
नमः सुन्दरायेन्दिरावल्लभाय॥ **13**॥

नमो विश्वकर्त्रे नमो विश्वहर्त्रे
नमो विश्वभोक्त्रे नमो विश्वमात्रे।
नमो विश्वनेत्रे नमो विश्वजेत्रे
नमो विश्वपित्रे नमो विश्वमात्रे॥ **14**॥

नमस्ते नमस्ते समस्तप्रपञ्च
प्रभोगप्रयोगप्रमाणप्रवीण।
मदीयं मनस्त्वत्पदद्वन्द्वसेवां
विधातुं प्रवृत्तं सुचैतन्यसिद्ध्यै॥ **15**॥

शिलापि त्वदङ्घ्रिक्षमासङ्गिरेणु
प्रसादाद्धि चैतन्यमाधत्त राम।
नरस्त्वत्पदद्वन्द्वसेवाविधानात्
सुचैतन्यमेतीति किं चित्रमत्र॥ **16**॥

पवित्रं चरित्रं विचित्रं त्वदीयं
नरा ये स्मरन्त्यन्वहं रामचन्द्र।
भवन्तं भवान्तं भरन्तं भजन्तो
लभन्ते कृतान्तं न पश्यन्त्यतोऽन्ते॥ **17**॥

स पुण्यः स गण्यः शरण्यो ममायं
    नरो वेद यो देवचूडामणिं त्वाम्।
सदाकारमेकं चिदानन्दरूपं
    मनोवागगम्यं परं धाम राम॥ **18**॥

प्रचण्डप्रतापप्रभावाभिभूत
    प्रभूतारिवीर प्रभो रामचन्द्र।
बलं ते कथं वर्ण्यतेऽतीव बाल्ये
    यतोऽखण्डि चण्डीशकोदण्डदण्डम्॥ **19**॥

दशग्रीवमुग्रं सपुत्रं समित्रं
    सरिद्दुर्गमध्यस्थरक्षोगणेशम्।
भवन्तं विना राम वीरो नरो वा -
    ऽसुरो वाऽमरो वा जयेत्कस्त्रिलोक्याम्॥ **20**॥

सदा राम रामेति रामामृतं ते
    सदाराममानन्दनिष्यन्दकन्दम्।
पिबन्तं नमन्तं सुदन्तं हसन्तं
    हनूमन्तमन्तर्भजे तं नितान्तम्॥ **21**॥

सदा राम रामेति रामामृतं ते
    सदाराममानन्दनिष्यन्दकन्दम्।
पिबन्नन्वहं नन्वहं नैव मृत्योः
    बिभेमि प्रसादादसादात्तवैव॥ **22**॥

असीतासमेतैरकोदण्डभूषैः
    असौमित्रिवन्द्यैरचण्डप्रतापैः।
अलङ्केशकालैरसुग्रीवमित्रैः
    अरामाभिधेयैरलं दैवतैर्नः॥ **23**॥

अवीरासनस्थैरचिन्मुद्रिकाढ्यैः
अभक्ताञ्जनेयादितत्त्वप्रकाशैः।
अमन्दारमूलैरमन्दारमालैः
अरामाभिधेयैरलं दैवतैर्नः॥ **24**॥

असिन्धुप्रकोपैरवन्ध्यप्रतापैः
अबन्धुप्रयाणैरमन्दस्मिताढ्यैः।
अदण्डप्रवासैरखण्डप्रबोधैः
अरामाभिधेयैरलं देवतैर्नः॥ **25**॥

हरे राम सीतापते रावणारे
खरारे मुरारेऽसुरारे परेति।
लपन्तं नयन्तं सदाकालमेवं
समालोकयालोकया शेषबन्धो॥ **26**॥

नमस्ते सुमित्रासुपुत्राभिवन्द्य
नमस्ते सदा कैकयीनन्दनेड्य।
नमस्ते सदा वानराधीशवन्द्य
नमस्ते नमस्ते सदा रामचन्द्र॥ **27**॥

प्रसीद प्रसीद प्रचण्डप्रताप
प्रसीद प्रसीद प्रचण्डारिकाल।
प्रसीद प्रसीद प्रपन्नानुकम्पिन्
प्रसीद प्रसीद प्रभो रामचन्द्र॥ **28**॥

भुजङ्गप्रयातं परं वेदसारं
मुदा रामचन्द्रस्य भक्त्या च नित्यम्।
पठन् सन्ततं चिन्तयन् स्वान्तरङ्गे
स एव स्वयं रामचन्द्रः स धन्यः॥ **29**॥

॥ इति श्रीरामभुजङ्गप्रयातस्तोत्रं समाप्तम् ॥